onlinesanskritbooks.com

# भज यतिराजम्

भज यतिराजं भज यतिराजं
भज यतिराजं भवभीरो ।
भज यतिराजं भज यतिराजं
भज यतिराजं भवभीरो ॥

श्रीरङ्गेशयजयाश्रयकेतुः
श्रितजनसंरक्षणजीवातुः ।
भवभयजलधेरेव हि सेतुः
पद्मानेतुः प्रणतौ हेतुः ॥ १॥

आदौ जगदाधारः शेषः
तदनु सुमित्रानन्दनवेषः ।
तदुपरि धृतहलमुसलविशेषः
तदनन्तरमभवद्गुरुरेषः ॥ २ ॥

भुङ्क्ते वैषयिकं सुखमन्यः
प्रचकास्त्येवानश्नन्नन्यः ।
इति यस्तत्वं प्राह वदान्यः
तस्मादधिकः को नु वदान्यः ॥३॥

onlinesanskritbooks.com

नष्टे नयने कस्यालोकः
चित्ते मत्ते कस्य विवेकः ।
क्षीणे पुण्ये कः सुरलोकः
कामे धूते कस्तव शोकः ॥ ४ ॥

निशि वनितासुखनिद्रालोलः
प्रातः परदूषणपटुशीलः ।
अन्तर्याति निजायुष्कालः किं
जानाति नरः पशुलीलः ॥ ५॥

केचिल्लीलालालसगतयः
केचिद्बालालालितरतयः ।
केचिद्दोलायितहमतयः केऽपि
न सन्त्यर्चितयतिपतयः ॥ ६॥

यावानबलो जरया देहः
तावान् प्रबलो विषये मोहः ।
वचसि विरक्ति श्रुतिपरिवाहः
मनसि हितस्त्वपरोऽपि विवाहः ॥ ७॥

कलुषनिकायं ललनाकायं
पश्यन्मुह्यसि सायं सायम् ।
जहि जहि हेयं तद्व्यवसायं
स्मर निरपायं चरमोपायम् ॥ ८॥

onlinesanskritbooks.com

रात्रिंदिवमपि भिक्षाचर्या
कलहायैवागच्छति भार्या ।
मध्ये बान्धवसेवा कार्या
कथय कदा तव देवसपर्या ॥ ९॥

अन्धं नयनं भूमौ शयनं
मन्दं वचनं मलिनं वदनम् ।
तस्मिन् काले गोप्तुं सदनं
वाञ्छसि दत्ततनूजानयनम् ॥ १०॥

तालच्छदकृतकुब्जकुटीरः
प्रतिगृहसन्ध्याकबलाहारः ।
विविधपटच्चरभारः क्रूरः
सोऽपि विधातृसमाहङ्कारः ॥ ११॥

मन्त्रद्रव्यविशुद्धो यागः
सर्वारम्भविरागस्त्यागः ।
कर्तुं शक्यो न कलौ योगः
किन्तु यतीशगुणामृतभोगः ॥

उपरि महोपलवर्षासारो
मार्गे कण्टककर्दमपूरः ।
कक्षे भारः शिरसि किशोरः
सुखयति घोरः कं संसारः ॥ १३॥

onlinesanskritbooks.com

भजसि वृथा विषयेषु दुराशां
विविधविचित्रमनोरथपाशाम् ।
कियदपि लभसे न हि तत्रैकं
किन्तु व्रजसि महान्तं शोकम् ॥ १४॥

कश्चन लोके करपुटपात्रः
पातुं सुतमाश्रितमठसत्रः ।
तस्मिन्वृद्धे तं सकलत्रः
शपति हि रण्डासुत इति पुत्रः ॥ १५॥

मनुजपतिं वा दिगधिपतिं वा
जलजभवं वा जगदधिपं वा ।
ममताहङ्कृतिमलिनो लोको
निन्दति निन्दति निन्दत्येव ॥ १६॥

पापहतो वा पुण्ययुतो वा
सुरनरतिर्यग्जातिगतो वा ।
रामानुजपदतीर्थान्मुक्तिं
विन्दति विन्दति विन्दत्येव ॥ १७॥

गुणगुणिनोर्भेदः किल नित्यः
चिदचिद्द्वयपरभेदः सत्यः ।
तद्द्वयदेहो हरिरिति तत्त्वं
पश्य विशिष्टाद्वैतं तत्त्वं ॥ १८॥

onlinesanskritbooks.com

यतिपतिपदजलगणिकासेकः
चतुरक्षरपदयुग्मविवेकः ।
यस्य तु सालनगर्यवलोकः
तस्य पदेन हतो यमलोकः ॥ १९॥

चिन्तय सर्वं चिदचिद्रूपं
तनुरिति तस्य हरेरनुरूपम् ।
तस्मात् कस्मिन्कलयसि कोपं
पश्चाद् भजसि दुरापं तापम् ॥ २०॥

यश्चतुरक्षरमन्त्ररहस्यं
वेद तमेव वृणीहि सदस्यम् ।
तच्चरणद्वयदास्यमुपास्यं
तद्विपरीतं मतमपहास्यम् ॥ २१॥

वैष्णवकुलगुणदूषणचिन्तां
मा कुरु निजकुलशीलाहन्ताम् ।
यतिपतिरेव हि गुरुरेतेषा-
मिति जानीहि महत्वं तेषाम् ॥ २२॥

सुमसुकुमारं शोभितमारं
रतिसुखसारं युवतिशरीरम् ।
गतजीवितमतिघोरविकारं
दृष्ट्वा गच्छसि दूरं दूरम् ॥

onlinesanskritbooks.com

विद्यानिपुणा वयमित्यन्ये
हृद्या धनिनो वयमित्यन्ये ।
सत्कुलजाता वयमित्यन्ये
तेषु कलिं परिपूर्णं मन्ये ॥ २४॥

यमकिङ्करकरमूले शूले
पतदभियाति हि फाले फाले ।
दहति तनुं प्रतिकूले काले
कं रमयसि तत्काले बाले ॥ २५॥

नरवाहनगजतुरगारूढाः
नारीसुतपोषणगुणमूढाः ।
नानारञ्जकविद्याप्रौढाः
नागरिकाः किं यतयो मूढाः ॥ २६॥

यस्य मुखस्था यतिपतिसूक्तिः
तस्य करस्था विलसति मुक्तिः ।
नरके पतितं नवनवयुक्तिः
नहि रक्षति सामान्यनिरुक्तिः ॥ २७॥

श्रुतिशिरसामत्यन्तविदूष्यं
सूत्रानभिमतमतिवैदुष्यम् ।
प्रथमं मङ्गलमनृतविशेष्यं
प्रलपसि किं प्राकृतकृतभाष्यं ॥ २८॥

onlinesanskritbooks.com

तस्करजारविदूषकधूर्ता
मस्करिमौनिदिगम्बरवृत्ताः ।
गुप्तधनीकृत धनमदमत्ताः
गुरवः किं परवञ्चकचित्ताः ॥ २९॥

कान्तिमतीसुकुमारकुमारं
केशवयज्वकिशोरमुदारम् ।
रामानुजमहिराडवतारं
मूकान्धानपि मोक्षयितारम् ॥ ३०॥

काषायाम्बरकवचितगात्रं
कलितकमण्डलुदण्डपवित्रं ।
विधृतशिखाहरिणाजिनसूत्रं
व्याख्यातद्वैपायनसूत्रम् ॥ ३१॥

यामुनपूर्णकृपोज्ज्वलगात्रं
रामाब्जाक्षमुनीक्षणपात्रम् ।
कोमलशठरिपुपदयुगमात्रं
श्रीमाधवसेनापतिमित्रम् ॥ ३२॥

सालग्रामे सर्वहितार्थं
येनास्थापि गुरोः पदतीर्थम् ।
तत्कुलदैवतहितपुरुषार्थं
सकलोपायाधिकचरमार्थम् ॥ ३३॥

onlinesanskritbooks.com

प्रवचनसक्तः प्रज्ञायुक्तः
परहितसक्तः परमविरक्तः ।
नानादैवतभक्त्या युक्तः
न भवति मुक्तो भवति न मुक्तः ॥ ३४॥

सन्त्यज सकलमुपायाचरणं
व्रज रामानुजचरणौ शरणाम् ।
पश्यसि तमसः पारं नित्यं
सत्यं सत्यं पुनरपि सत्यम् ॥ ३५॥

भगवद्रामानुजषट्त्रिंशः
सालग्रामगुरूत्तमवंश्यः ।
कौण्डिन्यः कविराह पवित्रं
रङ्गार्यो यतिराजस्तोत्रम् ॥ ३६॥

**॥ इति भज यतिराजस्तोत्रम् ॥**